# Shridhara Stutih

# શ્રીધરસ્તુતિઃ

## Document Information

Text title : Shridhara Stutih 3

File name : shrIdharastutiH3.itx

Category : deities_misc, gurudev, shrIdharasvAmI, stuti

Location : doc_deities_misc

Author : dvivedI es□ItArAmashAstrI pAvanjI

Proofread by : Paresh Panditrao

Description/comments : shrIdharasvAmI stotrANi. shrIdharasandeshaH

Latest update : January 14, 2023

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 15, 2023

*sanskritdocuments.org*

# શ્રીધરસ્તુતિઃ

(સ્રગ્ધરા વૃત્તમ્)

ભક્તાનાં કામધેનુઃ કલિયુગવરદો દત્તરાજઃ સ્વયમ્ભૂઃ
    લોકાનાં ઇષ્ટદાનપ્રણિહિતહૃદયઃ શ્રીધરાચાર્યરૂપઃ ।
વેદોક્તં ધર્મમાર્ગં બુધજનમહિતં બોધયન્ ભક્તવૃન્દં
    ભાત્યગ્રે પૂર્ણકામઃ કવિકુલમહિતો સિદ્ધવિદ્યાવિશિષ્ટઃ ॥ ૧॥

શ્રીમન્તઃ શ્રીધરાખ્યાઃ પરમગુરુવરા દત્તરાજાંશજાતાઃ
    શાન્તા દિવ્યસ્વરૂપાઃ નતજનસુહિતાઃ સત્યધર્માવતારાઃ ।
મહ્યાં બેઙ્ગરૂળરાજ્યે વૃષભપુરતલે કૃષ્ણરાજેન્દ્રવિધ્યાં
    આયાન્તિ પ્રેમપુરાઃ ભજકજનમુદે દ્વારકાનાથગેહે ॥ ૨॥

યેષાં પાણ્ડિત્યપૂર્ણં સકલજનહિતં વાક્યજાતં મહાન્તઃ
    શ્રુત્વા મોદાબ્ધિમગ્ના ભવજલતરણે લબ્ધનૌકાઃ સહર્ષાઃ ।
રાગદ્વેષાદિહીનાઃ હરગુરુ પરમા વશ્યસર્વેન્દ્રિયાન્તાઃ
    સર્વે તે લબ્ધકામા યમનિયમપરાઃ સર્વતઃ તૃપ્તચિત્તાઃ ॥ ૩॥

(અનુષ્ટુપ્ છન્દઃ)

જયન્તુ ગુરવઃ શાન્તાઃ શ્રીધરા રાજયોગિનઃ ।
પઞ્ચયજ્ઞપરા શ્રેષ્ઠા ભક્તાનાં કલ્પશાખિનઃ ॥ ૪॥

ભદ્ર શ્રી શ્રીધરેન્દ્રાય તપઃ સત્યરતાય ચ ।
વિશ્વવન્દ્યાઙ્ઘ્રિપદ્માય વિશ્વાનુગ્રહકારિણે ॥ ૫॥

ઇતિ શ્રીધરતીર્થસ્તુતિઃ સમાપ્તા ।

(રચયિતા – દ્વિવેદી એસ્. સીતારામશાસ્ત્રી પાવઞ્જી)

Proofread by Paresh Panditrao

*Shridhara Stutih*

pdf was typeset on January 15, 2023

Please send corrections to *sanskrit@cheerful.com*